# काव्ये रसस्वरूपमीमांसा

**डॉ. नीरजतिवारी**
सहयोगी-प्राध्यापकः,
संस्कृतसाहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्वविद्यालयः, लखनऊ

**प्रस्तावना शोधसारश्च -**

काव्यस्य आत्मभूतस्य रसस्य विषयः अतिविस्तारतया लक्षणग्रन्थेषु प्रतिपाद्यते । नाट्यशास्त्रे दशरूपके च रूपकाणां रसानां च विचारः दृश्यते । श्रृङ्गारतिलकं रसतरङ्गिणी इत्यादिग्रन्थाः रससिद्धान्तं प्रतिपादयन्ति। रसः एव काव्यास्वादनार्थः सहृदयानाकर्षयति। रसं विना काव्यं नीरसं भवति । अतः रसः अपि प्रमुखं काव्यतत्त्वं भवति । एवञ्च संस्कृतसाहित्यं द्विधा कथ्यते। लौकिकसाहित्यं वैदिकसाहित्यञ्चेति । वैदिकसाहित्यं नाम चत्वारः वेदाः भवन्ति लौकिकसाहित्ये दृश्यं श्रव्यं च इति भेदद्वयं वर्तते। दृश्यं नाम नाटकादीनि भवन्ति। श्रव्ये गद्यं पद्यं चम्पूरिति भेदत्रयं भवति । एवञ्च दृश्यश्रव्यात्मकानि काव्यानि आनन्दस्यन्दीनि इति । एवं काव्यानि सहृदयानन्दजनकानि वर्तन्ते।रसाः आस्वाद्यमानाः भवन्ति काव्ये। शब्दार्थौ काव्यमिति मम्मटप्रतिपादितं मतम्। एतावेव काव्यस्य शरीरमिति वक्तव्यम्। यथा शरीरस्याधिष्ठातृदेव आत्मा तथैव शब्दार्थरूपकाव्यशरीरस्यापि अधिष्ठातृदेवात्मनो विषये कल्पनन्नासमीचीनम्। -कोऽयमात्मा काव्यशरीरस्येति विषये एकाधिकाः सम्प्रदायाः समुपलभ्यन्ते। एतेषु सम्प्रदायेषु ड्कारसम्प्रदायःअल, वक्रोक्तिसम्प्रदायः, रीतिसम्प्रदायः, ध्वनिसम्प्रदायः, रमणीयतावादिसम्प्रदायः रससम्प्रदायश्च वैशिष्ट्येन गण्यन्ते। रसालंकाररीतिवक्रोक्तिध्वन्यौचित्यादय: सन्ति। एतेषां प्रवर्तकानां क्रमेण भरतभामहवामनकुन्तकानन्दवर्धनक्षेमेन्द्रादिमतानां संक्षेपेण वर्णनं विधाय तदनन्तरं रसस्वरूपविषये चर्चा एवं रससूत्रस्य चतुर्णामालोचकानां )भट्टलोल्लटशंकुकभट्टनायकाभिनवगुप्तादयदीनां) क्रमशः उत्पत्यनुमितिभुक्त्यभिव्यक्तिवादानां विवेचनम् वर्तते।

**कूटशब्दाः** –

रसः ,उत्पत्तिः ,निष्पत्तिः ,वादः ,सम्प्रदायः ,संयोगः ,व्यभिचारी ,अनुभावः ,विभावः , अनुमितिः, भुक्तिःकृत्रिमम्। ,नटः ,अभिव्यक्तिः ,

**विषयप्रवेशः** –

**अलङ्कारसम्प्रदायः -**

आचार्योदण्डी अलङ्कारसम्प्रदायस्य प्रमुखप्रसारकः। **'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते'**[1] इत्येतत् प्रतिपाद्य दण्डिना काव्येऽलङ्काराणाम् महत्त्वं प्रदर्शितम् । चन्द्रालोककारेण जयदेवेन तु अलङ्कारविरहे काव्यत्वमेव नाऽङ्गीकृतम् ।[2]

**वक्रोक्तिसम्प्रदायः -**

वक्रोक्तिसम्प्रदायस्य प्रवर्त्तकः कुन्तकः कुन्तकेन **वक्रोक्तिरेव " "वैदग्ध्यभंगीभणितिरुच्यते**[3] इत्युक्त्वा वक्रोक्तिसम्प्रदायस्य प्रतिष्ठा कृता । अनेनाचार्येण वक्रोक्तिं प्रतिपादयता ध्वन्यलङ्काररसादीनामप्यन्तर्भावो वक्रोक्तावेव घटितः।

**रीतिसम्प्रदायः -**

रीतिसम्प्रदायस्य व्याख्याता आचार्यो वामनः **'रीतिरात्मा काव्यस्य'**[4] इति प्रतिपाद्याचार्यवामनेन काव्ये प्राथमिकं रीतिमूल्यं स्वीकृतम् । किन्नाम रीतिः? इति समाधानाय **"विशिष्टपदरचनेति"**[5] वामनाचार्येण सम्यक्समाहितम् । अतएव काव्यशोभाकराः धर्मास्तेन गुणा एवोक्ताः ।[6] रीतिसम्प्रदायस्य प्रतिक्रियास्वरूपमेव ध्वनिसम्प्रदायस्य प्रादुर्भावः विद्यते ।

**ध्वनिसम्प्रदायः -**

ध्वनिसम्प्रदायस्य प्रवर्त्तकः आनन्दवर्धनाचार्यः। काव्यस्यात्मा ध्वनिरित्युक्तत्वाऽऽचार्यानन्दवर्धनेन अभिधाव्यापारस्य खण्डनं विधाय ध्वन्यर्थस्य महिमा प्रदर्शितः । ध्वनिकाव्यमेवाऽनन्दवर्धनेनोत्तमं काव्यमप्युक्तम् । अभिनवगुप्त -विश्वनाथ-मम्मट-प्रभृतयोऽप्याचार्ियाः ध्वनिकारस्य मतेन प्रभाविता आसन् इति।

**रमणीयतावादिसम्प्रदायः -**

---

[1] . काव्यादर्शः 2.1,3 -

[2] .चन्द्रालोकः 1.8-

[3] . वक्रोक्तिजीवितम् 1.10-

[4] . काव्यालङ्कारसूत्रम् 1.2.6-

[5] . काव्यालङ्कारसूत्रम् 1.2.7-

[6] 3.1.1- काव्यालङ्कारसूत्रम् .

रमणीयार्थप्रतिपादकः शब्दः काव्यमिति सिद्धान्तमाश्रित्य पण्डितराजजगन्नाथेन काव्ये रमणीयार्थ एव प्राणत्वेन स्वीकृतः। केयं रमणीयतेति महाकविमाघेन **'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'**[7] इत्युक्त्वा रमणीयतायाः सुस्पष्टा परिभाषा प्रदत्ता।

**रससम्प्रदायः एवं रसशब्दस्यार्थः स्वरूपञ्च -**

रससम्प्रदायस्य प्रवर्त्तको मुनिर्भरतः भरतमुनिना रसशास्त्रस्य शास्त्रीयं विवेचनम् सम्पादितम् । वस्तुतस्तु रसस्य सत्ता शाश्वती । रसानन्दः एव नान्यः । पारमार्थिकं सत्यं ब्रह्म च सच्चिदानन्दस्वरूपमेव कथ्यते। अतः रसोऽपि आत्मैव ब्रह्म वा। श्रीकृष्णेनाप्युक्तम् गीतायाम् - **"रसोऽहमप्सु कौन्तेय"**[8] इत्यपि प्रसिद्धम् । एषा रसस्याऽऽध्यात्मिकी स्थितिः । विश्वनाथ-प्रभृतिभिः रसवादिभिराचार्यैः रसः काव्यस्यात्मा एवोक्तः। यथा शरीरस्याधिष्ठानमात्मनि वर्तते तथैव काव्यशरीरस्याप्यधिष्ठानं रसएव वर्तते । रसं विना काव्यं निर्मूलम् । अतएवाचार्यैः रसस्यात्मता प्रतिपादिता । कैश्चिदुतु **'रसो वै ब्रह्मानन्दसहोदरः'** इत्युक्त्वा रसस्य ब्रह्मानन्देन तुल्यता वर्णिता । अत्रैतद् वैशिष्ट्येन वक्तव्यं यद् रसस्य ब्रह्मानन्दतुल्यतायाः हेतुः रसस्याखण्डताऽद्वैतता च वर्तते । यथाऽऽत्मनि अखण्डत्त्वं द्वैतत्वं च वर्तते तथैव रसानुभूतिरपि अखण्डाद्वैतानुभूतिसहिता च वर्तते। परन्तु अत्रापि ब्रह्मानन्दानुभूतेः रसानुभूतेश्चान्तरोऽपि सुस्पष्ट एवावलोक्यते । ये ब्रह्मानन्दमनुभवन्ति ते **'आत्मविद् आत्मैव भवति,**इति वेदान्तशास्त्रनियमानुसारं सर्वदा प्रपञ्चेनास्पृष्टा एव सन्ति, परं काव्यानन्दस्यास्वादकास्तावत्कालपर्यन्तमेवाखण्डस्याद्वैतस्य च रसस्यास्वादनं कुर्वन्ति, यावत्कालपर्यन्तं रसनिष्पत्तेः साधनानि विभावानुभावव्यभिचार्यादीनि तिष्ठन्ति । श्रव्यकाव्यस्य श्रवणकाले दृश्यकाव्यस्य दर्शनकाले च श्रोतुः द्रष्टुश्च रसानुभूतिः कथ्यते। यदा च न (नाटकस्य) काव्यश्रवणन्नच नाटकदर्शनन्तदा रसानभूतिरपि न दृश्यते। परं ब्रह्मानन्दस्य स्थितिः शाश्वती। एष एव द्वयोरन्तरः प्रतिभाति। कोऽयं रसानुभूतिप्रकारः इतीदानीमालोक्यते।

रस आस्वादे इत्यस्मात् धातोः अच् प्रत्यये कृते निष्पन्नोयं रसशब्दः आस्वादस्नेहाद्यर्थे प्रचलितो विद्यते।कोऽयं रसः कुत आगतः किं चास्य इतिहासः इति जिज्ञासायामाह यत् संस्कृतवाङ्मयस्य प्राचीनतमं साहित्यत्वेन विद्यते ऋग्वेदः ऋग्वेदे शब्दोऽयं मधुसोमजलगोक्षीराद्यर्थे प्रचलितो विद्यते। आदिवेदे समुद्धटितं विद्यते **"स्वादू पेयो**

[7] . शिशुपालवधमहाकाव्यम् 4.17 –

[8] . श्रीमद्भगवद्गीता 7.8 .अ –

**मधुपेयोवराय**"[9] अथ च **"योवः शिवतमो रसः"**[10] इत्येतेषु मन्त्रेषु अयं रसशब्दः लौकिकालौकिक उभयार्थे दृश्यते।कर्मकाण्डप्रधाने शुक्लयजुर्वेदे "**नमो वः पितरो रसाय**"[11] इत्युक्त्वा पितरं स्तौति मुनिः गान्धर्ववेदे "**अन्नात्परिश्रुतो रसं ब्रह्मणः**[12]" इति ब्राह्मणं रसत्वेन व्यवहरति।अन्तिमे अथर्ववेदे च "**या रसस्य वर्णस्य"** इत्यादि प्रयोगेन इदमायातं यत् तत्त्वार्थेऽपि रसशब्दस्य प्रयोगः दृश्यते। वेदोपरान्तं सर्वप्राचीनरुपेण विद्यन्ते उपनिषदः तत्रापि बाहुल्येन रसशब्दस्य उपस्थितिर्दृश्यते।बृहदारण्यक-कठ-तैत्तिर्योपनिषदेषु "**प्राणो वा अङ्गनां रसः"**[13] **"येन रुपं रसं गन्धम्"**[14] **"रसो वै सः"**[15] इत्यादिरुपे रसस्योपस्थितिरस्ति।ब्राह्मणादि ग्रन्थेश्वपि बाहुल्येन शब्दोऽयं विकीर्णो वर्तते।संस्कृतसाहित्यस्योपजीव्यद्वयग्रन्थयोः रामायणमहाभारतयोरपि रसशब्दप्रसक्तिः दृश्यते एव। रामायणे यथा –

**पाठ्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्। जातिभिः सप्तभिर्बद्धं, तन्त्रीलयसमन्वितम्।। रसैः श्रृंगारकरुणहास्यरौद्रभयानकैः। वीरादिभिश्च संयुक्तं काव्यमेतदगायताम्।।**[16]

श्लोकेस्मिन् काव्यशास्त्रीयरसशब्दस्य साक्षात् प्रयोगः समुपलभ्यते।निर्वचनशास्त्रे निरुक्तेऽपि यास्काचार्येण समुद्घाटितं यत् जलतुषारपयःकिरणादिष्वर्थे शब्दोऽयं प्रयुज्यते।मुखशास्त्रं व्याकरणम् रसास्वादनस्नेहनयोः चुरादिगणीय धातुं मूलत्वेनोपस्थापयति । व्याकरणशास्त्रीय रसप्रयोगस्यार्थः सोमरूपमधुररसगंधपरमात्माद्यर्थेषु समुदीरितमस्ति। यदि रसशब्दस्य निष्पत्तिं पश्यामः चेत् रसति रसयति वा रसः जलाद्यर्थे प्रसिद्धः। रसनं रसः श्रृंगारादिरसास्वाद्यर्थम् अभिव्यनक्ति। रस्यते अनेन इति रसः इति निष्पत्या गुणादयः अर्थत्वेन आयान्ति। आयुर्वेदेऽपि प्रसिद्धे चरकसंहिताग्रन्थे रसशब्दस्य उपलब्धिरस्ति। यथा-

**रसनार्थो रसस्तस्य द्रव्यमापः क्षितिस्तथा। स्वादुरम्लोऽथ लवणः कटुकस्तिक्त एव च।**

**कषायश्चेति षट्कोऽयं रसानां संग्रहः स्मृतः।।**[17]

---

[9] 6.4.44.21 – ऋग्वेदः .

[10] . शुक्लयजुर्वेदः 11.51.अ –

[11] . शुक्लयजुर्वेदः 2.32.अ –

[12] . शुक्लयजुर्वेदः 19.75.अ –

[13] .बृहदारण्योपनिषद् 1.3.19 –

[14] .कठोपनिषद्2.1.3 – .

[15] . तैत्तिरीयोपनिषद् 2.7.2 –

[16] . वाल्मीकिरामायणम् 1.2.18.40,42 –

[17] . चरकसंहिता1.64.अ –

अमरसिंहविरचिते अमरकोशे रसशब्दस्य विवेचनं प्राप्यते ते विभिन्नार्थे रसशब्दं समुपस्थापयन्ति। यथा-

**रूपं शब्दो गन्धरसस्पर्शाच्च विषया अमी।। तिक्तो अम्बलश्च रसाः पुंसि तद्धत्सुषऽमी त्रिषु।।**

**श्रृंगारादौ विषे वीर्ये गुणे रागे द्रवे रसः।।**[18]

प्रस्तुतेऽस्मिन् श्लोके श्रृंगारवीर्यगुणरागादिविषयेषु रसशब्दः परिकल्प्यते। नाट्यशास्त्रकर्ता भरतमुनिः स्वशास्त्रे भणति यत् "**विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः**"[19] इति अथ च "**नहि रसादृते कश्चिदर्थः प्रवर्तते**"[20] "**अष्टौ नाट्ये रसाः स्मृताः**"[21] इत्यादयः लिखितं वर्तते। विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः इत्यस्मिन् सूत्रे वर्णितानां प्रत्येकपदानां क्रमेण विवरणमपि नाट्यशास्त्रे साहित्यदर्पणादिषु च अस्त्येव नाट्यशास्त्रे यथा-

**बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः।**

**अनेन यस्मात्तेनायं विभाव इति संज्ञितः।।**[22]

अत्र इदं स्पष्टीभवति यत् विभावः कारणं निमित्तं हेतुरिति एते पर्यायवाचिनः शब्दाः सन्ति। अनेन माध्यमेन वाचिकाङ्गिकसात्विकाभिनयाः विभाविताः भवन्ति। "**विभाव्यन्तेऽनेन वागङ्गसत्वाभिनय इति विभावः**"।[23] अस्मात् कारणात् अयं विभाव इति संज्ञया व्यवह्रियते। इदानीं क्रमः वर्तते अनुभावस्य अनुभावविषयेऽपि उक्तमस्ति लोके यत् कार्यं भवति तदेव काव्ये नाटके च अनुभावपदेन गृह्यते। अस्य लक्षणमपि नाट्यशास्त्रकर्त्रा भरतेन प्रदत्तं विद्यते यत्-

**वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते**

**शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः।।**[24]

अर्थात् वागङ्गाभिनयेन यत्र अर्थः अनुभाव्यते सः अनुभावः इति। **"अनुभाव्यन्तेऽनेन वागङ्गसत्त्वकृतोऽभिनय इति"**[25] अनेन वाचिकाङ्गिकसात्त्विकाभिनयाः अनुभाविताः भवन्ति अनुभूतियोग्याश्च भवन्ति, अतः अस्य अनुभाव इति संज्ञा अस्ति। बहवः काव्यशास्त्रिणः

---

18 . अमरकोशः 89 ,27 .291.235 –

19 . नाट्यशास्त्रम् 6.32.अ -अभिनवभारती

20 . नाट्यशास्त्रम् 6.32.अ -अभिनवभारती

21 . नाट्यशास्त्रम् 6.16.अ -

22 . नाट्यशास्त्रम् 7.4.अ -

23 . नाट्यशास्त्रम् 7.3.अ -अभिनवभारती

24 . नाट्यशास्त्रम् 7.5.अ -

25 . नाट्यशास्त्रम् 7.4.अ -अभिनवभारती

कथयन्ति यत् अनुभावः क्रिया इति, अर्थात् या क्रिया विभावादिमाध्यमेन भवति सा क्रिया अनुभावत्वेन गृह्यते। सूत्रे तृतीयमस्ति व्यभिचारिभावः अस्मिन् विषयेऽपि नाट्यशास्त्रकारः वदति यत् -"**विविधमाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः**"।[26] "**वाङ्गसत्त्वोपेताः प्रयोगे रसान्नयन्तीति व्यभिचारिणः**"[27] अर्थात् ये विविधप्रकारैः रसानां प्रति सोन्मुखीभूय सञ्चरन्ति ते व्यभिचारिणः भवन्तीति।ये वाचिकाङ्गिकसात्त्विकाभिनयैः युक्तस्सन् प्रयोगेषु रसान्नयन्ति ते व्यभिचारिणः।समासेन इदं वक्तुं शक्यते व्यभिचारिभावः रसान् प्रतीतियोग्यान् कुर्वन्ति। साहित्यदर्पणेऽपि व्यभिचारिभावस्य लक्षणमस्त्येव। यथा -

**विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः। स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः।।**[28]

इदानीं क्रमः वर्तते स्थायिभावस्य। स्थायिभावस्य लक्षणं नाट्यशास्त्रे क्रियते। यथा-

**तथा नराणां नृपतिः शिष्याणां च यथा गुरुः।**
**एवं हि सर्वभावानां भावः स्थायी महानिह।।**[29]

अर्थात् सर्वभावानां भावत्वेन स्थायिरूपेण च विद्यमानो भवति स्थायिभावः। स्थायिभाव इव सर्वदा सर्वेषु भावेषु संपृक्तो भवति। साहित्यदर्पणे यथा –

**विरुद्धा अविरुद्धा वा यं तिरोधातुमक्षमाः।**
**आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः।।**[30]

अतः एतैः चतुर्भिः मिलित्वा रसमुद्भावयन्ति इति रसोद्भावनप्रक्रिया। मूलतः भरतोक्तरससूत्र एव आत्माभिप्रेतः, तस्याः एव परिभाषायाः विस्तारः काव्यप्रकाशकर्त्रा मम्मटेनापि चतुर्थोल्लासे कृतः। यथा-

**कारणान्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।।**
**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः।।**[31]

---

26 . नाट्यशास्त्रम् 7.8 .अ –
27 7 .अ – नाट्यशास्त्रम् .
28 . साहित्यदर्पणम् 3.14 –
29 . नाट्यशास्त्रम् 7.8 –
30 3.174 – साहित्यदर्पणम् .
31 . काव्यप्रकाशः 28-4.27 .उ –

**रसानुभूतौ साधारणीकरणव्यापारः -**

रसानुभूतौ साधारणीकरणप्रक्रियायाः स्वरूपं मनोवैज्ञानिकम्वर्तते। अनया प्रक्रियया रत्यादयो भावाः आश्रयालम्बनयोरेव न भूत्वा नाटकदर्शकैः साधारणजनैश्चापि सम्बद्धाः भवन्तीत्येवास्य व्यापारस्य साधारणीकरणयोजना। प्रकारान्तरेणैतदुच्यते यत् साधारणीकरणप्रक्रियाद्वारा दुष्यन्तादिभिः रत्यादेर्याऽनुभूतिरनुभूयते सा साधारणदर्शकैश्चापि निःसंशयमेवानुभूयते। एतदेवाश्रयस्य दर्शकस्य च श्रोतुर्वा तादात्म्यम्। एवञ्च किमपि वस्तुविशेषं यथाऽऽञ्जनस्य भावस्यालम्बनतां याति तथैव सर्वेषां सहृदयपाठकानां, श्रोतृणां दर्शकानाञ्च भावस्यालम्बनत्वमाप्नोति । अनेनैतदपि स्पष्टं भवति यत्साधारणीकरणमालम्बनत्वधर्मस्यैव सञ्जायते । साधारणीकरणस्योपयुक्तेन व्यापारेणैव रसनिष्पत्तिद्वारमनावृत्तं भवति । रसनिष्पत्तेर्विषयेऽपि नैक्मत्यमाचार्याणां वर्तते । एषु आचार्येषु भट्टलोल्ल्ट-शंकुक-भट्टनायकाभिनवगुप्ताचार्याणां मतानि सुप्रख्यातान्येव सन्ति । अत्रैषामाचार्याणां मतानामालोचनात् पूर्वं रसनिष्पत्तेः प्रमुखविचारकस्याचार्यस्य भरतमुनेः रसनिष्पत्तिसम्बद्धस्य मतस्य सङ्केतः आवश्यकः वर्तते।

**भरतमुनेः रसनिष्पत्तिसम्बन्धिमतम् -**

विभावानुभावव्यभिचारिभावानां संयोगाद् रसनिष्पत्तिः सञ्जायते । इत्युक्त्वाऽऽचार्य भरतेन रसनिष्पत्तेः प्रक्रिया निर्दिष्टा। भरतमुनिसूत्रान्तर्गतप्रयुक्तस्य **'निष्पत्ति'** शब्दस्यार्थस्य विषये नास्त्यैकमत्यम्। भट्टलोल्लटमते निष्पत्त्यर्थः **'उत्पत्तिः',** 'शङ्कुकमते**ऽनुमिति**ः', भट्टनायकमते **'भुक्तिः'** अभिनवगुप्तमते च निप्पत्त्यर्थः **'अभिव्यक्तिः'** वर्तते। इदानीं भट्टलोल्लटाद्याचार्याणां उपर्युक्तभरतमुनिसूत्रोधृतमतानामपेक्षितमालोचनं प्रस्तूयते।

रससूत्रस्य व्याख्यातृरुपेण चतुरः आलोचकाः चर्चिताः सन्ति। तेषां नामानि भट्टलोल्लटशंकुकभट्टनायकाभिनवगुप्ताः इति ते क्रमशः उत्पत्यनुमितिभुक्त्यभिव्यक्तिवादप्रवर्तकाः सन्ति। अस्य रसशास्त्रस्य लक्ष्यग्रन्थाः महाकाव्यनाटकादयः सन्ति।

**भट्टलोल्लटस्य उत्पत्तिवादः -**

यत् पूर्वमेवोक्तं भट्टलोल्लटाचार्येण निष्पत्त्यर्थः उत्पत्तिगृहीतः। अतएवास्य सिद्धान्तोऽपि उत्पत्तिवादनाम्ना प्रख्यातः । भट्टलोल्लटाचार्यस्य मतमस्ति यत् विभावानुभावादिसंयोगात् अनुकार्येषु रामादिषु रसोत्पत्तिः सञ्जायते । तत्रापि सीताप्रभृतयो विभावाः प्राधान्येन रसस्योत्पादकाः सन्ति । कटाक्षभुजापादयोऽनुभावाः उत्पन्नस्य रसस्य बोधकाः भवन्ति ।

निर्वेदादयो व्यभिचारिभावाश्च तस्य रसस्य पोषकाः सन्ति । अतएव स्थायिभावस्य विभावानाञ्च सम्बन्धः उत्पाद्योत्पादकभावसम्बन्धः, स्थायिभावस्यानुभावानाञ्च सम्बन्धो गम्यगमकभावसम्बन्धः, स्थायिभावस्य व्यभिचारिभावानाञ्च सम्बन्धः पोष्यपोषकभावसम्बन्धश्च निश्चीयते ।[32]

**भट्टशङ्कुकस्य अनुमितिवादः -**

अनुमितिसिद्धान्तस्य अनुसर्त्राऽऽचार्यशङ्कुकेन भरतमुनिसूत्रवर्त्तिनः निष्पत्तिशब्दस्यार्थोऽनुमितिः संयोगशब्दस्यार्थश्च गम्यगमकभावसम्बन्धः स्वीकृतः। अतएवास्य सिद्धान्तोऽनुमितिवादः इति प्रख्यायते । शङ्कुकाचार्येण सामाजिकेन सह रसस्य सम्बन्धः स्थापितः । एतदनुसृत्य नटः कृत्रिमरूपेणैवानुभावादीनां प्रकाशनं विदधाति । तान् कृत्रिमान् अनुभावादीनपि दृष्ट्वा सामाजिकः नटे वस्तुतो विद्यमानस्यापि रसस्यानुमानं करोति । स्ववासनया च वशीभूतः सामाजिकस्तस्यानुमीयमानस्य रसस्यास्वादनं प्राप्नोति ।[33]

**भट्टनायकस्य भुक्तिवादः -**

भुक्तिवादसिद्धान्तानुसारं रसस्य **'निष्पत्तिः'** नानुकार्ये रामादौ न चानुकर्तरि नटादौ सञ्जायते । भट्टनायकमते तु रसः सामाजिकेनैवानुभूयते । एवञ्च भट्टनायकेन भट्टलोल्लट-अनुमितिवादसिद्धान्त-शङ्कुकयोर्द्वयोरप्याचार्ययोः उत्पत्तिवादयोर्निराकरणं कृतम् । भट्टनायकेन भुक्तिवादसिद्धान्तस्य पुष्ट्यर्थं भावकत्वभोजकत्वरूपौ व्यापारौ स्वीकृतौ भावकत्वव्यापारेण काव्यार्थस्य साधारणीकरणं सम्पाद्यते, भोजकत्वव्यापारेण च सामाजिकेन साधारणीकृतः स्थायिभावो रसरूपेण भुज्यते । अतएव भट्टनायकमते निष्पत्तिशब्दस्यार्थो भुक्तिरिति स्वीक्रियते।[34]

**अभिनवगुप्तस्य अभिव्यक्तिवादः -**

तन्त्राद्यनेक शास्त्रनिष्णातेनाचार्याभिनवगुप्तेन **'अभिव्यक्तिवादः'** सिद्धान्तः प्रस्थापितः। आचार्याभिनवगुप्तेन भरतमुनिसूत्रस्य **'निष्पत्ति'** शब्दार्थः अभिव्यक्तिः इत्युच्यते । अभिनवगुप्तमते सामाजिकस्थः स्थायिभाव एव रसानुभूतेर्निमित्तं वर्तते । संस्काररूपेण सामाजिकस्थः स्थायिभावः साधारणीकृतैर्विभावादिभिरभिव्यक्तो भवति । अभिनवगुप्तेन भट्टनायकाङ्गीकृतौ

---

32 . संस्कृतकाव्यशास्त्रेतिहासः 64 .पृ –

33 . संस्कृतकाव्यशास्त्रेतिहासः 65 .पृ –

34 . संस्कृतकाव्यशास्त्रेतिहासः 65 .पृ –

भावकत्वभोजकत्वव्यापारौ न हि स्वीकृतौ । अनेन त्वाचार्येण साधारणीकरणव्यापारस्यैव महत्त्वं प्रतिपादितम् । साधारणीकरणव्यापारस्य विवेचनं तु पूर्वकृतमेवेति न पुनरावृत्तिरपेक्ष्यते ।[35]

**निष्कर्षः -**

वस्तुतस्तु रसस्वरूपमलौकिकमेव निर्धार्यते अभिनवगुप्तप्रभृतिभिः साहित्यशास्त्र विवेचकैराचार्यैः। एतदेवास्य विलक्षणत्वं यद् विभावादिभिर्लौकिकैः पदार्थैरभिव्यक्तउद्बुद्धौ वा रसो लोकिकः कथ्यते । रसानुभूतिस्थितौ लौकिकं न सुखं, न च दुःखं, न भयं, न प्रीतिः, न पुण्यं, न पापमं, नोत्साहो न च कार्पण्यं दृश्यते । तत्रत्वखण्डस्य भिन्नाभिन्नत्वरहितस्य चानन्दस्यानुभूतिरनुभूयते । अत एव न तत्र श्रृंगारो, न करुणः, न वीरो, न भयानकः, न हास्यो, न रौद्रः, नाद्भुतो, न शान्तः, न च बीभत्सोऽवलोक्यते । एतेषाम् स्थितिस्तु व्यावहारिकी, परं रसानुभूतिरलौकिकी अव्यावहारिकी च निश्चीयते । अतएव सर्वेषामपि रसानां विश्वनाथप्रभृतिभिराचार्यैः सुखात्मकता प्रतिपाद्यते । किमधिकं विश्वनाथादिभिराचार्यैः करुणरसस्यापि आनन्दात्मकत्वं सम्पादितम् । यदुक्तमाचार्यैविश्वनाथैः -

**करुणादावपिरसे जायते यत् परं सुखम् । सचेतसामनुभवः प्रमाणं तत्र केवलम्।।**

**किञ्च तेषु यदा दुःखं न कोऽपि स्यात् तदुन्मुखः । तथा रामायणादीनां भविता दुःखहेतुता।।**[36]

अतः काव्यरसाः सहृदयैः काव्येषु आस्वाद्यमानाः भवन्ति । अनेके आलङ्कारिकाः नवरसानां स्वरूपं स्वमत्यनुसारं उक्तवन्तः । अन्ये केचन अष्टौ स्थायिनः तद्रसान् च उररीचक्रुः। आलङ्कारिकैः यथामति चर्चितार्थः अयं **काव्ये रसस्वरूपमीमांसा""** इति विषयः। सहृदयानन्द जनकः ब्रह्मानन्दसहोदरः वर्तते ।

**सन्दर्भग्रन्थाः –**

1. नाट्यशास्त्रम् 2040 .सं.वि ,वाराणसी ,चौखम्भासंस्कृतसंस्थान ,श्रीबाबूलालशुक्लशास्त्री -
2. साहित्यदर्पणम् 2013 ,वाराणसी ,चौखम्भासुरभारतीप्रकाशन ,आचार्यशिवप्रसादशास्त्री -
3. चन्द्रालोकः 2014 ,वाराणसी ,चौखम्भासुरभारतीप्रकाशन ,श्री कृष्णमणि त्रिपाठी -
4. संस्कृतकाव्यशास्त्रेतिहासः ,वाराणसी ,चौखम्भासुरभारतीप्रकाशन ,जगदीशचन्द्रमिश्र.आ - 2002

[35] . संस्कृतकाव्यशास्त्रेतिहासः 66 .पृ –

[36] . साहित्यदर्पणम् -3.4.5

5. काव्यप्रकाशः - चौखम्भाप्रकाशन2022 ,वाराणसी ,
6. अमरकोशः 2005 ,जयपुरम् ,सत्यदेवमिश्रः जगदीशसंस्कृतपुस्तकालय.डा -
7. श्रीमद्भगवद्गीता गोरखपुरम् ,प्रेसगीता -
8. ऋग्वेदः -चौखम्भाविद्याभवनम्2002 ,वाराणसी ,
9. शुक्लयजुर्वेदः 2022 ,वाराणसी ,चौखम्भाविद्याभवनम् -
10. कठोपनिषद् गोरखपुरम् ,गीताप्रेस -
11. तैत्तिरीयोपनिषद् गोरखपुरम् ,गीताप्रेस -
12. वाल्मीकिरामायणम् 2015 ,गोरखपुरम् ,गीताप्रेस ,महर्षिबाल्मीकि -
13. चरकसंहिता1941,मुम्बई,निर्णयसागरप्रेस ,चक्रपाणि -
14. काव्यादर्शः 2018 ,वाराणसी ,चौखम्भाविद्याभवन -
15. वक्रोक्तिजीवितम् 2022 ,वाराणसी ,चौखम्भापब्लीसिन्गहाउस ,परमेश्वरदीनपाण्डेयः.पं -
16. काव्यालङ्कारसूत्रम् 1971 ,वाराणसी ,चौखम्भासंस्कृतसीरिज ,बेचनझा.पं -
17. शिशुपालवधमहाकाव्यम् - पं1969 ,इलाहाबाद ,संस्कृतसाहित्यभण्डार ,आद्याप्रसादमिश्र.